## ॥ नवग्रह सूक्तम् ॥

## | | navagraha sūktam | |

ॐ आसत्येन रजसा वर्तमानो निवेशय-न्नमृतं मर्त्यं च।

हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन्।

om āsatyena rajasā vartamāno niveśaya-nnamṛtaṁ martyaṁ ca |
hiraṇyayena savitā rathenā''devo yāti bhuvanā vipaśyan |

अग्निं दूतं वृणीमहे होतारं विश्व-वेदसम्।

अस्य यज्ञस्य सुक्रतुम् ॥

agniṁ dūtaṁ vṛṇīmahe hotāraṁ viśva-vedasam |
asya yajñasya sukratum | |

येषामीशे पशुपतिः पशूनां चतुष्पदा-मुत च द्विपदाम्।

निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु॥

yeṣāmīśe paśupatiḥ paśūnāṁ catuṣpadā-muta ca dvipadām |
niṣkrīto'yaṁ yajñiyaṁ bhāgametu rāyaspoṣā yajamānasya santu | |

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते आदित्याय नमः ।

om adhidevatā pratyadhidevatā sahitāya bhagavate ādityāya namaḥ |

ॐ आप्यायस्व समेतु ते विश्वत-स्सोम वृष्णियम्।

भवा वाजस्य संगथे॥

om āpyāyasva sametu te viśvata-ssoma vṛṣṇiyam |
bhavā vājasya saṁgathe | |

अप्सुमे सोमो अब्र-वीदन्तर्-विश्वानि भेषजा।

अग्निञ्च विश्वशंभुव-मापश्च विश्व-भेषजीः -।

apsume somo abra-vīdantar-viśvāni bheṣajā |
agniñca viśvaśaṁbhuva-māpaśca viśva-bheṣajīḥ - |

गौरी मिमाय सलिलानि तक्ष-त्येकपदी द्विपदी सा चतुष्पदी।

अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥

gaurī mimāya salilāni takṣa-tyekapadī dvipadī sā catuṣpadī |

aṣṭāpadī navapadī babhūvuṣī sahasrākṣarā parame vyoman ||

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते चन्द्राय नमः।

om adhidevatā pratyadhidevatā sahitāya bhagavate candrāya namaḥ |

ॐ अग्निर्-मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।

अपागं-रेतागंसि जिन्वति।

om agnir-mūrddhā divaḥ kakutpatiḥ pṛthivyā ayam |
apāgṁ-retāgṁsi jinvati |

स्योना पृथिवि भवाऽनृक्षरा निवेशनि।

यच्छान-श्शर्म सप्रथाः॥

syonā pṛthivi bhavā'nṛkśarā niveśani |
yacchāna-śśarma saprathāḥ ||

क्षेत्रस्य पतिना वयगंहिते नेव जयामसि।

गामश्वं पोषयिन्त्वा स नो मृडाती-दृशे॥

kṣetrasya patinā vayagṁhite neva jayāmasi |
gāmaśvaṁ poṣayintvā sa no mṛḍātī-dṛśe ||

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते अङ्गारकाय नमः।

om adhidevatā pratyadhidevatā sahitāya bhagavate aṅgārakāya namaḥ |

ॐ उद्बुध्य-स्वाग्ने प्रतिजा-गृह्ये-नमिष्टा-पूर्ते सगं-सृजेथा-मयञ्च।

पुनः कृण्वग्गस्त्वा पितरं युवानमन्-वातागंसी-त्वयि तन्तुमेतम्॥

om udbudhya-svāgne pratijā-gṛhye-namiṣṭā-pūrte sagṁ-sṛjethā-mayañca |
punaḥ kṛṇvaggstvā pitaraṁ yuvānaman-vātāgṁsī-tvayi tantumetam ||

इदं विष्णुर्-विचक्रमे त्रेधा निदधे पदम्।

समू-ढमस्य-पागं सुरे॥

idaṁ viṣṇur-vicakrame tredhā nidadhe padam |
samū-ḍhamasya-pāgṁ sure ||

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णो-श्श्नप्त्रेस्थो विष्णो-स्स्यूरसि विष्णोर्-ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥
viṣṇo rarāṭamasi viṣṇoḥ pṛṣṭhamasi viṣṇo-śśnaptrestho viṣṇo-ssyūrasi viṣṇor-
dhruvamasi vaiṣṇavamasi viṣṇave tvā ||

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भवगते बुधाय नमः।
om adhidevatā pratyadhidevatā sahitāya bhavagate budhāya namaḥ |

ॐ बृहस्पते अतियदर्यो अर्हा-द्युमद्वि-भाति क्रतुम-ज्जनेषु।

यद्दीदय-च्चवसर्त-प्रजात तद-स्मासु द्रविणन्-धेहि चित्रम्॥
om bṛhaspate atiyadaryo arhā-ddyumadvi-bhāti kratuma-jjaneṣu |
yaddīdaya-ccavasarta-prajāta tada-smāsu draviṇan-dhehi citram ||

इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिब-स्सुतस्य।

तव प्रणीती तव शूर-शर्म-न्नाविवासन्ति कवय-स्सुयज्ञाः॥
indramarutva iha pāhi somaṁ yathā śāryāte apiba-ssutasya |
tava praṇītī tava śūra-śarma-nnāvivāsanti kavaya-ssuyajñāḥ ||

ब्रह्म-जज्ञानं प्रथमं पुरस्ता-द्विसी-मत-स्सुरुचो वेन आवः।

सबुध्नियां उपमा अस्य विष्ठा-स्सतश्च योनि-मसतश्च विवः॥
brahma-jajñānaṁ prathamaṁ purastā-dvisī-mata-ssuruco vena āvaḥ |
sabudhniyā upamā asya viṣṭhā-ssataśca yoni-masataśca vivaḥ ||

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते बृहस्पतये नमः।
om adhidevatā pratyadhidevatā sahitāya bhagavate bṛhaspataye namaḥ |

ॐ प्रव-श्शुक्राय भानवे भरध्वगं हव्यं मतिं चाग्नये सुपूतम्।

यो दैव्यानि मानुषा जनूग्ग्ष् अन्तर्-विश्वानि विद्म ना जिगाति॥
om prava-śśukrāya bhānave bharadhvagṁ havyaṁ matiṁ cāgnaye supūtam |
yo daivyāni mānuṣā janūggṣ antar-viśvāni vidma nā jigāti ||

इन्द्राणीमासु नारिषु सुपत्नी-महमश्रवम्।

न ह्यस्या अपरंचन जरसा मरते पतिः॥
indrāṇīmāsu nāriṣu supatnī-mahamaśravam |
na hyasyā aparaṁcana jarasā marate patiḥ ||

इन्द्रं वो विश्वत-स्परि हवामहे जनेभ्यः।

अस्मा-कमस्तु केवलः॥

indraṁ vo viśvata-spari havāmahe janebhyaḥ ।
asmā-kamastu kevalaḥ ।।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते शुक्राय नमः।

om adhidevatā pratyadhidevatā sahitāya bhagavate śukrāya namaḥ ।

ॐ शन्नो देवी-रभिष्टय आपो भवन्तु पीतये।

शंयोर्-अभि-स्रवन्तु नः॥

om śanno devī-rabhiṣṭaya āpo bhavantu pītaye ।
śaṁyor-abhi-sravantu naḥ ।।

प्रजापते न त्वदेतान्-यन्यो विश्वा जातानि परिता बभूव।

यत्-कामास्ते जुहुमा-स्तन्नो अस्तु वयग्ग्-स्याम पतयो रयीणाम्।

prajāpate na tvadetān-yanyo viśvā jātāni paritā babhūva ।
yat-kāmāste juhumā-stanno astu vayagg-syāma patayo rayīṇām ।

इमं यम-प्रस्तर-माहि सीदाऽङ्गि-रोभिः पितृभि-स्संविदानः।

आत्वा मन्त्राः कविशस्ता वहन्-त्वेना राजन् हविषा मादयस्व॥

imaṁ yama-prastara-māhi sīdā'ṅgi-robhiḥ pitṛbhi-ssaṁvidānaḥ ।
ātvā mantrāḥ kaviśastā vahan-tvenā rājan haviṣā mādayasva ।।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते शनै-श्चराय नमः।

om adhidevatā pratyadhidevatā sahitāya bhagavate śanai-ścarāya namaḥ ।

ॐ कया नश्चित्र आभु-वदूती सदावृध-स्सखा।

कया शचिष्ठया वृता॥

om kayā naścitra ābhu-vadūtī sadāvṛdha-ssakhā ।
kayā śaciṣṭhayā vṛtā ।।

आऽयङ्गौः पृश्निर-क्रमी-दसनन्-मातरं पुनः।

पितरञ्च प्रयन्त्-सुवः॥

ā'yaṅgauḥ pṛśnira-kramī-dasanan-mātaraṁ punaḥ ।
pitarañca prayant-suvaḥ ।।

यत्ते॑ दे॒वी निर्ऋ॑तिर्-आब॒बन्ध॒ दाम॑ ग्री॒वास्व॑-विच॒र्त्यम्।

इ॒दन्ते॒ तद्विष्या॒-म्यायु॑षो॒ न मध्या॒-दथा॑जी॒-वः पि॒तुम॑द्धि॒ प्रमु॑क्तः॥

yatte devī nirṛtir-ābabandha dāma grīvāsva-vicartyam ।
idante tadviṣyā-myāyuṣo na madhyā-dathājī-vaḥ pitumaddhi pramuktaḥ ।।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते रह॒वे॒ नम॑ः।

om adhidevatā pratyadhidevatā sahitāya bhagavate rahave namaḥ ।

ॐ के॒तुङ्-कृ॒ण्वन्न॑के॒-तवे॒ पेशो॑ मर्या अपे॒शसे।

समु॒षद्-भि॑रजायथाः -॥

om ketuṅ-kṛṇvannake-tave peśo maryā apeśase ।
samuṣad-bhirajāyathāḥ - ।।

ब्र॒ह्मा दे॒वानां पद॒वीः क॒वीनाम्-ऋषि॑र्-विप्रा॑णां महि॒षो मृ॒गाणाम्।

श्ये॒नो-गृध्रा॑णा॒ग्ग्-स्वधि॑ति॒र्-वना॑ना॒ग्ं सोम॑ः प॒वित्र॒-मत्ये॑ति॒ रेभन्॥

brahmā devānāṁ padavīḥ kavīnām-ṛṣir-viprāṇāṁ mahiṣo mṛgāṇām ।
śyeno-gṛdhrāṇāgg-svadhitir-vanānāgṁ somaḥ pavitra-matyeti rebhan।।

सचि॑त्र चि॒त्रं चि॒तयन्-तम॒स्मे चित्र॑क्षत्र चि॒त्रत॑मं वयो॒धाम्।

च॒न्द्रं र॒यिं पु॑रु॒वीरम् बृ॒हन्तं॒ चन्द्र॒-च॒न्द्राभि॑र्-गृ॒ण॒ते यु॑वस्व॥

sacitra citraṁ citayan-tamasme citrakṣatra citratamaṁ vayodhām ।
candraṁ rayiṁ puruvīram bṛhantaṁ candra-candrābhir-gṛṇate yuvasva ।।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते केत॒वे॒ नम॑ः।

om adhidevatā pratyadhidevatā sahitāya bhagavate ketave namaḥ ।

ॐ शान्ति॒ श्शान्ति॒ श्शान्ति॑ः॥

om śānti śśānti śśāntiḥ ।।